# .. hariharAtmajAShTakAmstotram ..

# ॥ हरिहरात्मजाष्टकाम्स्तोत्रम् ॥

हरिवरासनं विश्वमोहनं हरिधदीश्वरामाराध्यपादुकम् ।
अरिविमर्दनं नित्यनर्तनं हरिहरात्मजं देवमाश्रये ॥ १
शरणकीर्तनं शक्तमानसं भरणलोलुपं नर्तनालयम् ।
अरुणभासुरं भूतनायकं हरिहरात्मजं देवमाश्रये ॥ २
प्रणयसत्यक प्राणनायकं प्रणतकल्पकं सुप्रभाञ्चितम् ।
प्रणवमन्दिरं कीर्तनप्रियं हरिहरात्मजं देवमाश्रये ॥ ३
तुरगवाहनं सुन्दराननं वरगदायुधं वेदवर्णितम् ।
गुरुकृपाकरं कीर्तनप्रियं हरिहरात्मजं देवमाश्रये ॥ ४
त्रिभुवनार्चितं देवतात्मकं त्रिनयनप्रभुं दिव्यदेशिकम् ।
त्रिदशपूजितं चिन्तितप्रदं हरिहरात्मजं देवमाश्रये ॥ ५
भवपयापहं भावुकावहं भुवनमोहनं भूतिभूषणम् ।
धवलवाहनं दिव्यवारणं हरिहरात्मजं देवमाश्रये ॥ ६
कलमृदुस्मितं सुन्दराननं कलभकोमलं गात्रमोहनम् ।
कलभकेसरी वाजिवाहनं हरिहरात्मजं देवमाश्रये ॥ ७
श्रितजनप्रियं चिन्तितप्रदं श्रुतिविभूषणं साधुजीवनं ।
श्रुतिमनोहरं गीतलालसं हरिहरात्मजं देवमाश्रये ॥ ८

Encoded and proofread by Antaratma antaratma at Safe-mail.net

# Document Info

| | |
|---|---|
| **Text title :** | hariharaatmajaaShTakaamstotram |
| **Author :** | |
| **Language :** | Sanskrit |
| **Category :** | aShTaka |
| **Subject :** | Hinduism \religion \traditional |
| **Description/Comments :** | |
| | |
| **Transliterated by :** | Antaratma antaratma at Safe-mail.net |
| **Proofread by :** | Antaratma antaratma at Safe-mail.net |
| **Latest update :** | April 17, 2007 |

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

*Please help to maintain respect for volunteer spirit.*

hariharatmaja8.pdf
was typeset on January 19, 2015 using XeLaTeX

Please send corrections to *sanskrit@cheerful.com*